# Shri Bhutaraja Stotram

# શ્રીભૂતરાજસ્તોત્રમ્

## Document Information

Text title : bhUtarAjastotram

File name : bhUtarAjastotram.itx

Category : deities_misc, gurudev

Location : doc_deities_misc

Latest update : December 30, 2020

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

September 16, 2023

*sanskritdocuments.org*

# શ્રીભૂતરાજસ્તોત્રમ્

પ્રસાદાર્થં સદા નારાયણભૂતાખ્યમાદરાત્ ।
વાદિરાજગુરોર્દૂતં ભૂતરાજં નતોऽસ્મ્યહમ્ ॥ ૧॥

સ્મરતાં નિયમેનૈવ ભૂતભીત્યાદિભઞ્જનમ્ ।
વાદિરાજગુરોર્દૂતં ભૂતરાજં નતોऽસ્મ્યહમ્ ॥ ૨॥

ગુરોર્દક્ષિણભાગસ્થં ભજતાં ભદ્રદં દ્રુતમ્ ।
વાદિરાજગુરોર્દૂતં ભૂતરાજં નતોऽસ્મ્યહમ્ ॥ ૩॥

ભૃતૈઃ કર્ણવિકર્ણાખ્યૈર્યુક્તં ભૂતગણૈઃ સદા ।
વાદિરાજગુરોર્દૂતં ભૂતરાજં નતોऽસ્મ્યહમ્ ॥ ૪॥

ક્રૂરં ઘોરં તથા શૂરં ધનુઃખડ્ગાદિ ધારિણમ્ ।
વાદિરાજગુરોર્દૂતં ભૂતરાજં નતોऽસ્મ્યહમ્ ॥ ૫॥

પ્રતાપવન્તં વીરાગ્ર્યં વીરભદ્રોપમં હૃદિ ।
વાદિરાજગુરોર્દૂતં ભૂતરાજં નતોऽસ્મ્યહમ્ ॥ ૬॥

રક્તામ્બરધરં રમ્યપુષ્પમાલાસુશોભિતમ્ ।
વાદિરાજગુરોર્દૂતં ભૂતરાજં નતોऽસ્મ્યહમ્ ॥ ૭॥

રત્નૌઘવલયોપેતં મુક્તાહારવિભૂષિતમ્ ।
વાદિરાજગુરોર્દૂતં ભૂતરાજં નતોऽસ્મ્યહમ્ ॥ ૮॥

અર્કાભાઙ્ગદસંયુક્તં રત્નકુણ્ડલમણ્ડિતમ્ ।
વાદિરાજગુરોર્દૂતં ભૂતરાજં નતોऽસ્મ્યહમ્ ॥ ૯॥

ઉત્તુઙ્ગતુરગારૂઢં છત્રચામરસેવિતમ્ ।
વાદિરાજગુરોર્દૂતં ભૂતરાજં નતોऽસ્મ્યહમ્ ॥ ૧૦॥

દિવ્યચન્દનલિપ્તાઙ્ગં કસ્તૂરીતિલકાઞ્ચનમ્ ।
વાદિરાજગુરોર્દૂતં ભૂતરાજં નતોऽસ્મ્યહમ્ ॥ ૧૧॥

અચિન્ત્યાદ્ભુતસન્મૂર્તિં કિરિટોજ્જ્વલમસ્તકમ્ ।
વાદિરાજગુરોર્દૂતં ભૂતરાજં નતોઽસ્મ્યહમ્ ॥ ૧૨॥

કુબેરકોશાદાનીતં દિવ્યમૌલીન્દુપાર્ષદમ્ ।
વાદિરાજગુરોર્દૂતં ભૂતરાજં નતોઽસ્મ્યહમ્ ॥ ૧૩॥

મસ્તકાર્પિત તન્મૌલિં વાદિરાજસ્ય સન્મુનેઃ ।
વાદિરાજગુરોર્દૂતં ભૂતરાજં નતોઽસ્મ્યહમ્ ॥ ૧૪॥

માનેન ગુરુણા દત્તે નૂપરે દધતં મુદા ।
વાદિરાજગુરોર્દૂતં ભૂતરાજં નતોઽસ્મ્યહમ્ ॥ ૧૫॥

તસ્માદ્ ગુરોઃ પ્રસાદસ્ય પૂર્ણપાત્રં તપોનિધિમ્ ।
વાદિરાજગુરોર્દૂતં ભૂતરાજં નતોઽસ્મ્યહમ્ ॥ ૧૬॥

રક્ષકં મહિમાસક્તં સદા સર્વત્ર સર્વદા ।
વાદિરાજગુરોર્દૂતં ભૂતરાજં નતોઽસ્મ્યહમ્ ॥ ૧૭॥

વાદિરાજગુરોર્દૂત ભૂતરાજસ્તુતિં સદા ।
યઃ પઠેચ્ચિન્તિતં ક્ષિપ્રં ભવેત્તસ્ય ન સંશયઃ ॥ ૧૮॥

શ્રીવાદિરાજહૃત્પદ્મસંસ્થિતં તુરગાનનમ્ ।
ભજામિ સતતં સર્વવિનુતં ચિત્તશુદ્ધયે ॥ ૧૯॥

॥ ઇતિ શ્રીભૂતરાજસ્તોત્રં સમ્પૂર્ણમ્ ॥

*Shri Bhutaraja Stotram*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*